ज्जनयेच्च कुष्ठं तांस्तान् विकारांश्च बहुप्रकारान्। दूषितं देशकालान्न दिवास्वप्नैरभीक्ष्णशः। यस्माद्दूषयते धातून् तस्माद्दूषीविषं स्मृतम्"

**दूष्य** त्रि॰ दूषि—कर्मणि ण्यत्। १दूषणीये "दूष्यं वचो मम पुनर्निपुणं विभाव्य" अनुमानदीधितिः। "राज्योपघातं कुर्वाणा ये पापाचारवल्लभाः। एकैकशः संहता वा दूष्यांस्तान् परिचक्षते" कामन्दकी॰उक्ते २राजद्रोपघातके। ३वस्त्रे ४वस्त्रगृहे न॰ मेदि॰ ५पूये न॰ हेमच॰ ६हस्तिवक्ष्वरज्ज्वाम् स्त्री हेमच॰।

**दूष्युदर** न॰दूषिभिर्दोषैः कृतमुदरं तन्नामा रोगः। सुश्रुतोक्ते दोषकृते उदररोगभेदे तन्निदानादि तत्रोक्तम् उदरशब्दे ११४८पृ॰दर्शितम् "प्रकीर्तितं दूष्युदरन्तु घोरम्"सुश्रुतः

**दृ** आदरे तु॰ आ॰ सक॰ अनिट्। द्रियते अदृत। अयमाङ्पूर्व एव प्रयुज्यते। "निपीय यस्य क्षितिरक्षिणः कथां तथाऽऽद्रियन्ते न बुधाः सुधामपि" नैष॰ आदृतः आदरः। "दरादराभ्यां दरकम्पिनी पपे" नैष॰ "न जातहार्द्देन न विद्विषादरः" किरा॰ "आदृत्यस्तेन हृत्येन" भट्टिः।

**दृ** बधे स्वादि॰ पर॰सक॰ अनिट्। दृणोति अदार्षीत् ददार स्वादिगणे छन्दसीत्यधिकारे "विंक्षि जिरि दाश दृ—हिंसायाम्" पा॰ उक्तेः छान्दसोऽयम्। "क्षिणोतिर्भाषायामपीत्येके" सि॰कौ॰ उक्तेः अन्यस्यापि क्वचिद्भाषायां प्रयोग इति गम्यते मत्स्यघातिनि धीवरे दाशशब्दप्रयोगात्। [संक्षिप्तसारे

**दृक्क** न॰ दृ+विदारे बा॰ कक् हस्वस्य न कित्त्वम्। छिद्रे

**दृक्काण** न॰ज्योतिषोक्ते राशेस्तृतीये दशांशरूपे अंशे द्रेक्काणे "त्रिंशल्लभे विंशतिरुक्षमे स्वे हृद्देऽक्षिचन्द्राद्दशकं दृकाणे" नील॰ता॰ पञ्चवर्गीबलकथने दृक्काणशब्दे विवृतिः।

**दृक्कर्ण** पुंस्त्री॰ दृक् नेत्रमेव कर्णोऽस्य। सर्पे हेमच॰ स्त्रियां जातित्वात् ङीष्।

**दृक्कर्मन्** न॰ दृगर्थं दृष्ट्यर्थं कर्म। ग्रहाणां दर्शनयोग्यताज्ञानार्थे सू॰सि॰ उक्ते कर्मभेदे तच्च ग्रहनक्षत्रयोगाद्युपयोगि संस्कारभेदरूपं यथाह तत्र

"नक्षत्रग्रहयोगेषु ग्रहास्तोदयसाधने। शृङ्गोन्नतौ तु चन्द्रस्य दृक्कर्मादाविदं स्मृतम्" सू॰सि॰ "अत्र निमित्तसप्तमी ग्रहनक्षत्राणां बहुत्वाद्बहुवचनम्। नक्षत्रग्रहयोर्युत्यर्थं नक्षत्रग्रहयोरिदं द्वयं दृक्कर्म स्मृतं प्रागुक्तम् आदौ प्रथमं कार्यम्। ताभ्यामनन्तरं क्रिया कार्येत्यर्थः। अत्र नक्षत्रध्रुवकाणामायनदृक्कर्मसंस्कृतानामेवोक्तत्वादायनं दृक्कर्म न कार्यमिति ध्येयम्। ग्रहाणामस्तोदयौ नित्यास्तोदयौ सूर्यसान्निध्यजनितास्तोदयौ च ग्रहाणामुपलक्षणत्वान्नक्षत्राणामपि। तयोः साधननिमित्तं ग्रहस्य नक्षत्रस्य वा देयम्। अत्राक्षदृक्कर्मार्थं केवलः शरः साध्यः। न तु दिनमानरात्रिमाननतोन्नते साध्ये। क्षितिजसम्बन्धेन दृग्ग्रहरूपोदयास्तलग्नस्यावश्यकत्वेन क्षितिजातिरिक्तायनपरिणामस्य व्यर्थत्वात् युतौ तु समप्रोतवृत्ते युगपद्दर्शनार्थं तत्परिणामस्यावश्यकत्वात्। शृङ्गोन्नतिनिमित्तं चन्द्रस्य। तुकारः समुच्चयार्थकचकारपरः। अत्रापि श्लोके पूर्वार्द्धोक्तमाक्षदृक्कर्म संस्कार्यमिति ध्येयम्"। रङ्गना॰

दृक्कर्म द्विविधम् आयनमाक्षजञ्च तत्रायनदृक्कर्मायनशब्दे ७७१पृ॰ सि॰शि॰ उक्तं दर्शितम् आक्षजं दृक्कर्मोच्यते

"इदानीमाक्षजं दृक्कर्माह प्रमि॰ "स्फुटास्फुटक्रान्तिजयोश्चरार्धयोः समान्यदिक्कोऽन्तरयोगजासवः। पलोद्भवाख्या भनभःसदां शरे महत्ययाल्पे यदि वा स्युरन्यथा। स्पष्टेषुरक्षश्रवणेन हतो विभक्तो लम्बज्यया रविहृतोऽक्षभया हतो वा। लब्धं हतं त्रिभगुणेन हृतं द्युमौर्व्या स्युर्वाऽसवः पलभवा अथ तैः शरे तु। याम्योत्तरे क्रमविलोमविधानलग्नं खेटात् कृतायनफलादुदयाख्यलग्नम्। सौम्ये क्रमेण विपरीतमिषौ तु याम्ये भार्धाधिकात् खचरतोऽस्तविलग्नमेवम्"मू॰। "ग्रहस्य स्फुटक्रान्तेरस्फुटक्रान्तेश्चरार्धे साध्ये। यदि स्फुटास्फुटक्रान्ती तुल्यदिक्के तदा चरार्धयोरन्तरं कार्यम्। यदि भिन्नदिक्के तदा योगः। एवं येऽसवो भवेयुस्ते पलोद्भवा ज्ञेयाः। ग्रहस्य भस्य वा यदा महांस्तरस्तदैवम्। यदाल्पस्तदान्यथा वा पलोद्भवासवः साध्याः। ग्रहस्य स्पष्टः शरोऽक्षश्रवणेन गुण्यो लम्बज्यया भाज्यः। अथ वा अक्षभया गुणितो द्वादशभिर्भाज्यः। यल्लब्धं तत् त्रिज्यया गुण्यं द्युज्यया भाज्यं फलं पलोद्भवा असवो भवन्तीत्यनुकल्पः। अथ कृतायनदृक्कर्मकं ग्रहं रविं प्रकल्प्य तैः पलोद्भवासुभिर्लग्नं साध्यम्। यदि ग्रहस्य याम्यः शरस्तदा क्रमविलग्नम्। यदि सौम्यस्तदा विलोमलग्नम्। एवं कृते सति ग्रहस्योदयलग्नं भवति। अथ तमेव ग्रहं सभार्धं रविं प्रकल्प्य तैरेवासुभिरुत्तरे शरे यत् क्रमलग्नं याम्ये विलोमं क्रियते तद्ग्रहस्यास्तलग्नम्"। "अत्रोपपत्तिः। अत्र गोले विषु-